शुभं देवस्यानिश्चितं अल्पाङ्कं साधकस्यापि सौख्य मेव न संशयः उक्त क्रमेण गणयेत् साधकः स्थिरमानसः महा विद्यानायिकाभि यत भूतादि साधने संप्रोक्तं चक्र सारञ्च सर्व मन्त्रेषुगोपितं एतच्चक्र विचारेण सिद्धि माप्नोति साधकः ॥ १३ ॥

बालादि चक्रम्

अः ५	अं ६	औ ८	ओ ७	ऐ ५	ए ४	ॡ ३	ऌ ४	ॠ ३	ऋ ३	ऊ ४	उ ३	ई ५	इ ५	आ ७	अ ७
त ३	ण ४	ढ ५	ड ६	ठ ८	ट ७	ञ ५	झ ८	ज ३	छ ३	च ४	ङ ५	घ ४	ग ५	ख ८	क २
स ५	ष ४	श ६	व ५	ल ४	र ५	य ६	म ५	भ ७	ब ४	फ ८	प ६	न ७	ध ५	द ४	थ ४
भ ४	म ५	य ४	र ३	ल ४	व ३	श ४	ष २	स ४	ह ३	क्ष ३	त्र ३	० ०	र १	क्ष ३	ह ३
ज ३	झ २	ञ ७	ट ४	ठ ५	ड ५	ढ ७	ण ७	त ५	थ ३	द ३	ध ७	न ४	प ७	फ ५	ब ५
ॠ ५	ऌ ५	ॡ ५	ए ३	ऐ ई ३	ओ ३	औ ५	अं ५	अः ५	क ४	ख ६	ग २	घ ५	ङ ५	च ४	छ ४
भ व ४	०	र थ ४	ल ग ५	त्र प ५	म त ७	च ठ ६	स ह ७	क्ष ऋ ३	अ ४	आ ४	इ ५	ई ४	उ ५	ऊ ४	ऋ ५
१	७	४	३	२	२	५	४	३	३	३	२	२	६	६	७

येप्रथमं दुःखं द्वितीयं सर्व भाग्यदम् तृतीयं च तथा नाथ गृहणीयात निज सिद्धये तृतीये प्रथमं भद्रं द्वितीयं दुःखदाय-कम् तृतीयं च तथा प्रोक्तमष्टातर गृहंभयं चतुर्दशान्तरं भद्रं मूध्य मन्त्रं द्वितीयकम तृतीयस्थंषोऽशाङ्कं महाकल्याण दायकम् अधोमुक्ति षोऽशाङ्क चतुर्थं शत्रु सेवनं तृतीये मध्यगेहस्थं ब्रह्मकल्याण दायकं वसुन्तरं सर्वशेप गृहमध्य-स्थमेव च अष्टमच महाभद्रं युग्मांचित्तभयप्रदम् अष्टादशाङ्क शुभदं शेषगेहत्रयेतथा शेष पद त्वाराणाञ्च मन्त्रंचेतसिवर्तते एततशुभाशुभं ज्ञात्वा मन्त्रमार्णं तदभ्यसेन विष्णुस्थितं तथा मन्त्रं नायिकास्थं शिवस्थितं सूर्य्यसंस्थं ब्रह्मसंस्थं गृह्णी-यान्क्ताक्तमेव च वैष्णवे विष्णुमन्त्रार्थं शैवः शिवमुपाश्र-येत् नायिका मन्त्रजापी च नायिकार्णं सदाभ्यसेत् सूर्य्यमन्त्र विचारार्थी सूर्य्य मन्त्रं समाश्रयेत् एकस्य च युगंस्थानं तृतीयस्थानं मेव च ज्ञात्वा मन्त्रं प्रगृह्णीयात् अन्यथा चा शुभं भवेत् एतदन्यत् संमत्रं दिव्यवीरेषुगीयते एतच्चक्रं पशोरुक्तं सर्वसिद्धि प्रदं शुभं एतच्चक्र प्रसादेन पशुर्वीरोपमः स्मृतः सर्वसिद्धि भूतायुत्वा वत्सरात्तु प्रपश्यति । विष्णुः (१५)

शुभद २	शुभद ४ .	८ भाप
शुद्ध ७	भागपद १०	नादिका सिद्धि १२
भद्र २	शिव दुखं ८	भयद ८
भद्रद १४	भद्रग २४	महाकल्याणद १६
मुक्तिदं १६	शत्रु ४	ब्रह्मकल्यानद ८
महाभद्रद ८	भयद २	शुभदं

सूक्ष्म चक्रम् इति श्री रुद्रयामले उत्तर तन्त्रे महा तन्त्रोदीपने सर्व्व तन्त्रानुष्ठाने सिद्ध मंत्र प्रकरणे भाव निर्णये भैरवी भैरव संवादे पंचमः ।

श्री देव्युवाच महाकथह चक्रार्थं सर्वचक्रोत्तमोत्तमम् यस्यविचार मात्रेण कामरूपी भवेन्नरः तत् प्रकारं वीरनाथ क्रमशः क्रमशः श्रृणु चतुरस्रे लिखेद्वर्णांश्चतुः कोष्ट समन्विते चतुष्कोष्टे चतुष्कोष्ठ चतुश्चतुर्गृहान्वितं मन्दिरं षोडशप्रोक्तं सर्वकामार्थ सिद्धिदम् चतुरस्रांलिखेत् कोष्ठं चतुः कोष्ठसमान्वितं पुनश्चतुष्कं तत्रापि लिखेत धीमान

क्रमेणतु सर्व्वेषुपदमध्येतु प्रादाक्षिण्य क्रमेणतु अकारादिक्ष
कारान्तान् लिखित्वा गणयेत्ततः चन्द्रमग्नि रुद्रवद्र वर्ण
नवमं युगलं तथा वेदमर्क दशरसं वसुं षोडश मेव च
चतुर्द्दश भौतिकं च सप्तपञ्चदशेति च वन्हीन्दुकोष्ठगं वर्ण
सङ्केताङ्कमेषादितं एतदङ्क स्थितं वर्ण गणयेत् तदनन्तरं
नामाद्यक्षर मारभ्य यावन्मन्त्रादि माक्षरम् चतुर्भिः कोष्ठै
रेकैकं इति कोष्ठचतुष्टयम् पुनः कोष्ठप कोष्ठेषु सव्यतोनाम्नं
आदितः सिद्धः साध्यः सुसिद्धिऽरिः क्रमशोगणयेद्दशी
सिद्धःसिद्ध्यतिकालेन साध्यस्तुजप होमतः सुसिद्धोग्रहणात्
ज्ञानी शत्रुर्हन्त्रीचमा युधम् सिद्धार्णोवान्धवः प्रोक्तः साध्यः
सेवकउच्यते पोषकोऽरयः शत्रुर्घातक उच्यते सिद्ध कोष्ट
स्थितावर्णावान्धवा सर्वकामदा जपेन बन्धुः सिद्धःस्यात
सेवकोऽधिकसेव्यापुष्णाति पोषकोऽभीष्टं घातको नाशयेद्
ध्रुवम् सिद्धसिद्धो यथोक्तेन द्विगुणंसिद्ध साधकः सिद्धः
सुसिद्धोऽर्द्धजपात सिद्धारि हन्तिवान्धवान् साध्यासिद्धो
यथोक्तेन द्विगुणं सिद्धसाधकःसाध्य साध्योनिरर्थकः तत्त
सुसिद्धोगणयःसाध्यारिर्हान्त्रिगोत्रजाम् सुसिद्ध सिद्धोऽर्द्धजपात
तत् साध्यो द्विगणाधिकात् ततसुसिद्धो ग्रहादेवसुसिद्धारिः

स्वगोत्रहा अरीसिद्धः सुतानूदन्यात्. अरिसाध्यस्तु कन्यकः
ततसुसिद्धस्तुपत्नीघ्नसदारिर्हन्तिसर्वकम्यदिवैरिमनोह्स्तास्थितः
साधकोमुत्रितदात्तद्रत्तणार्थंहि कुर्य्यादेवक्रियादिकम् तत
प्रकारं महावीर श्रृणुष्वगिरिजापते वटपत्रं लिखित्वारि मन्त्रं
स्रोतसिनिःत्तिपेत् एवंमन्त्रविमुक्तःस्यात् ममज्ञापल्लहेतनापुनः
प्रकारं त्रिमेन्द्रो गवांत्तीरे मुदान्वितः द्रोनमित्तेजयेन्मन्त्र
मष्टोतरसमन्वितम् पीत्वात्तीरं मनोमध्येतुवैरि मन्त्रप्रमुक्तये
पुनप्रकारत्त्वया। त्रिरात्रमकवासरम् उपोष्यविधिना तेन पुजां
कृत्वाशतौकुजे सहस्रं वसतंत्रापि अष्टोत्तर समन्वितम् जपि-
त्वासंत्यजेन्मन्त्री त्तीरसारमराडले अथवात्तद्गुरोः स्थाने
चात्यस्थाने च वा पुनः विचार्य्य मन्त्रवर्णं च गृहित्वा
मोत्तमाप्नुयात स्वप्ने यादिमहामन्त्रं प्राप्नोतिसाधकोत्तमः
तदासिद्धमवाप्नोति सत्यं सत्यं कुलेश्वर तन्मन्त्रंकौलिके-
नाथ गुरौयत्नेन संगृहीत्तदाभवति सिद्धःस्यात् ततत्तणा-
न्नात्रसंशयः अरिश्चदेवदेवेश यादिविग्रहयेतमनुम् अन्यमन्त्रं
विचद्यैवाविष्णाश्चैव शिवस्यच शक्ति मन्त्र यदिरिपुंतदाएवं
प्रकारकम् आदावन्ते च मध्ये च ओं वौषट स्वहयान्वितम्
कृत्वाजप्ता महासिद्धिं कामरूपस्थितामिव प्राप्नोति

नात्रसन्देहो ममाज्ञाबलवत्तरा शृणु चक्रफलं नाथ विचारा चार मङ्गलं प्रदं च महा मन्त्रं सद्गुरोर्मुख पङ्कजात लभ्यते यदि भाग्येन सिद्धिरेव न संशयः तदभावेसिद्ध मन्त्र दृष्टो दृष्टफलोन्मुखम महाचमत्कारकरं दयाश्चसंवर्द्धनम स्वप्ने वासद्गुरोः स्थान प्राप्तिमात्रेण मुक्तिभाक तन्मन्त्रं वर्ज्जयित्वा-तुघोरान्धाकाररौरवे वसंतिसर्वकालं च ममज्ञाबल भागिनी तत्रैव चक्रसारादि विचार व्यर्थ भाषणम अरिमत्रं महापुण्यं सर्वमन्त्रोत्तमोत्तमम कोटिजन्मार्ज्जितै पुण्यैः महाविद्याश्रयी भवेत स्वप्नैकोटि कुलोत्तपन्नैः पुण्य कोटिफलैरपि प्राप्नो-तिसधको मन्त्रं भुक्तयेमुक्तये ध्रुवम तंत्र चक्रं न विचार्य्यं विचार्य्य मरणं भवेत किन्तुचक्रं विचार्य्यं च यदि स्वप्ने च यतकृतम एतेषां चक्रवर्गाणां विचारादष्ट सिद्धिदम राज्यं वृत्तिधनं योगसिद्धि वृद्धि सर्वशुभम धर्म देह पवित्र च अकालमृत्यु हरणम वाञ्छाफल प्रदंगौरी चरणां भोज-दर्शनम भुक्ति मुक्ति हरस्थानं प्राप्नोति नात्रसंशयः एषा चक्रादिकानांच क्रमशोगदितं फलं यदिसर्व विचारं च करोति साधकोत्तमः तदासर्वफलं नित्यं प्राप्नोतिनात्रसंशयः महा प्रभविवेकंच विचारा लभ्यते ध्रुवम अकस्मात सिद्धि

माप्नोति चक्रराजाविचारतः सर्वेदेवाः चक्र मन्त्रार्चितंजनम् राज्यसिद्धि भवेत क्षिप्रंप्राणायामादि सिद्धिभाक सर्वेषां प्राणदं भूमौ विचरेतसाधकोवलीति इते कथितंनाथ चक्रषो डशंमगलम् चक्राणां लोकनादेव सायुज्यपदमाप्नुयात अतोविचारं सर्वत्र सर्वचक्रादि मङ्गलम् ।

(अकथह चक्रम्) (१६)

अकथह	उङप	आखधक्ष	ऊचल
ओडव	लाझम	औठश	लृभम
इघन	ऋञभ	इगप	ऋहव
आतस	एठल	अंणश	एटर


पुस्तकान्तर अत्र पंचम पटल समाप्तिः ।

श्री चक्रम् ।

पद्माकारं महाचक्रं दलाष्टक समन्वितम् अआवर्ण द्वयंपूर्व्वे द्वितीये च द्वितीय के तृतीये कर्ण युग्मं च चतुर्थे नासिकाद्वयम् पञ्चमे लृयुग्मञ्च षष्ठे ओष्ठाधरं तथा

सप्तमे दन्तं युग्मं च अष्टमे षोडशस्वरम् कवर्गञ्च पूर्व्वदले द्वितीये च चवर्गकं तृतीये च टवर्गञ्च चतुर्थे च तवर्गकम् पवर्गं पञ्चमे प्रोक्तं यादिवान्तं च षष्ठके सप्तमे त्रिः समालेख्यं हलक्षमष्टमेछदे सुखंराज्यं धनं विद्यां यौवनापुष्पमेवच विचार्य्ये चक्रं प्राप्नोति पुत्ररत्नंच जीवनं स्वीयनामाक्षरं ज्ञात्वा यत्र देवाक्षरं तथा एकस्थानं युगस्थानं विरोधंद्विविधं स्मृतं जीवनं मरणं तत्र आकारादिषुपत्रके लिखित्वा गणयेन्मन्त्री मरण वर्ज्जयेत सदा यत्रास्तिमरणं तत्र जीवनं नास्तिनिश्चितं परस्परविरोधेन सिद्धि मरणं च मृत्युदम् जीवने जीवनं ग्राह्यं सर्व्वत्रमरणंत्यजेत् ।

श्री चक्रम्



(१३२ पृ०) के आगे

कुलाकुलस्य भेदंहि वक्ष्यामिमन्त्रिणामिह वाय्वाग्नि भूजलाकाशाः पञ्चाशल्लिपयः क्रमात् पञ्चह्रस्वाः पञ्च दीर्घाः बिन्द्वन्ताः सन्धिसम्भवाः कादय पञ्चशः पञ्चल सहान्ताः समीरिताः साधकस्याक्षरं पूर्वं मन्त्रस्यापि तथाक्षरं यद्येक भूत दैवत्यं जानीयात् स्वकुलं हितम् भौमस्य वारुणं मित्र माग्नेयस्यापि मारुतं मारुतं पार्थिवा नांच शत्रु राग्नेय मम्भसां ऐन्द्रवारुणयोः शत्रुर्मारुतः परिकीर्तितः पार्थिवेवारुणं मित्रं तैजसं शत्रुरीरितं नाभसं सर्व्वं मित्रंस्याद्विरुद्धं नैवशीलयेत् रेखाषटकांहि पूर्वाग्रं रेखैकादशाग्रपत दक्षिणोत्तरभागेन दक्षिणा वक्षिमालिखेत्

———

कुलाकुल चक्रम्

वायुः	अग्निः	भूमिः	जलं	आकाशः
अ	इ	उ	ऋ	लृ
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
प	फ	ब	भ	म
य	र	ल	व	श
श	ष	ल	स	ह


कुलाकुल चक्रं च कथितं तारा चक्रं शृणु प्रिये दक्षिणोत्तर दशे च रेखा चतुष्टयं लिखेत् दश रेखाः पश्चिमाग्राः करतव्यावर दायक अश्विन्यादि क्रमेणैव लिखेत्तारकाः पुनः वक्ष्यमाण क्रमेणैव तन्मध्ये वर्णकान्

लिखेत् युग्ममेकं तृतीयञ्च वेद मेकैकं युग्मकम् एकं युग्मं भुजैकञ्च युगलं युगलं युगम् एकं युग्मं त्रयं चैव चन्द्रानल विधुं विधुम् चन्द्र युग्मं चन्द्र युग्मं रामं वेदं गृहे शुभे वर्णक्रमात् स्वरान्त्यौतौ रेवत्यंश गताबुभौ अकार द्वयमश्विन्या देवतागण सम्भवा इकारं भरणी मर्त्य मिमुम् स्वर कृत्तिकाम् राक्षसी कृतिका भूमौ सर्व्व विघ्नविनाशिनी नासिका गरुड मन्त्रञ्च रोहिणी नर रूपिणी डोष्ट मध्ये मृग शिरः देवता परि कीर्तिता अधरान्त मार्द्रया च मायुनुषं सर्व्व लक्षणं दन्त युग्मं पुनर्व्वस्वाद्रा दितं मानुषं प्रियं कः पुष्पा देवता ज्ञेया खगा श्लेषा च राक्षसी मघा रक्षो घडन्ताच च पूर्व्वा फाल्गुनी नरा छ ज्ञोत्तरा फाल्गुनी च मनुष्या परि कीर्तिता कञ हस्ता देवगणा ट ठ चित्रा च राक्षसी ड स्वाती देव रमणी त्रिशाषाण्ण राक्षसी तथ दानु राधया च शोभिता देवताधिकाध ज्येष्ठा राक्षसी ज्ञेया मूलान प फ राक्षसी पूर्व्वा षाढा मानुषी च बकाक्षर मालिनी भोत्तरा षाढया मर्त्या मकारे श्रवणा मता धनिष्ठा पररक्षः स्त्री लस्था शत भिषा तथा वश पूर्व्व भाद्र पदा मनुजा

परि कीर्तिता अथोत्तरा भाद्र पदा मनुजा कीर्तिता स्त्र जातौ परमा प्रीति मध्यमा भिन्न जातिषु रक्षो मानुष योर्नाशो वैरं दानव देवयोः जन्म सम्पत् विपत् क्षेमं प्रत्यरिः साधको बधः मित्रं परम मित्रञ्च गणयेच्च पुनः पुनः ओं नमो भगवत्यैः जन्मोद्धार निरीक्षिणी हतहली वेदादि बीजादिया नित्यं चेतसि भाव्यते सुखिसदा सद्ध व संचारिणी । मायानु प्रियदा सदा सविपदं संहार यित्री-धरे धात्रि त्वं स्वय मादि देव बनिता दीना निर्दीनं पशुम् ॥ १ ॥ रक्ताभ्रा मृत चंद्रिका लिपिमयी सर्पा कृति निद्रिमा जाग्रद्धर्म्मा समाश्रिता भगवती त्वं मां समालोकय मांसोद्गन्ध प्रफुल्ल दोप जडितं वेदादि कार्यान्वितं संपाल्या मल कोटि चन्द्र कोटि किरणे नित्यं शरीरं कुरु ॥ २ ॥ सिद्धार्थी निज दोष विभू खल गतिर्व्या हीयते विद्यया कुण्डल्या कुल मार्ग कुल मार्ग युक्त नगरी सायान्ह मार्गाश्रिया यद्येवं भजति प्रभात समये मध्यान्ह कालेऽथवा नित्यंयः कुल कुण्डली निज पदाम्भोजं स सिद्धो भवेत् ॥ ३ ॥ वाय्वाकाश चतुर्दलेऽति विमले बांच्छा फलोन्मूलके नित्यं संप्रति

सम्प्राप्ति नित्य देह घटिता सांकेतिना भाविना ॥ त्रिधा कुण्डल मालिनी स्व जननी सार क्रिया भाव्यते पैत्तैः सिद्ध कुलोद्भवैः प्रणतिभिः सद्योगिभिः शम्भुभिः ॥४॥ माता शंकर मोहिनी त्रिशरणाच्छाया पुटोद्भामिनं संसारादि महा सुख प्रहननी । नेत्रा स्थिता योगिनी सर्व ग्रन्थि विभेदिनी स भुजगा सूक्ष्मातिसूक्ष्मा परा ब्रह्म ज्ञान विनोदिनी कुल कुटी याडाकिनी भाव्यतो ॥ ५ ॥ वन्दे श्रीकुल कुण्डली त्रिवलिभिः सार्द्धैः स्वयम्भुप्रियाम् प्रावेष्टा सुर सार चित्त चपला बालाबला निष्फला या देवी परि भाति वेद वदना सम्भावना भावना तानिष्टा शिरसि स्वयं भुवनि तां सम्भावयामि क्रियाम् ॥ ६ ॥ वाणी कोटि मृदङ्ग नाद मदनानिः श्रोणि कोटि ध्वनिः प्राणे शीशषवः समूल कमली लासैक पूर्णानन आषाडोद्भव मेघ राजनि युत ध्वान्तान्तरस्थापिनी मातामा परिपात सूक्ष्म पथगा मां योगिनं संकुरु ॥७॥ त्वामा श्रित्य नरा ब्रजन्ति सहसा बैकुंठकै तासयो रानन्दै कविलासिनीशशिशता तस्या तना कारणा माता श्रीकुल कुण्डालि प्रिय करे काली कुलो द्दीपने भूतस्थां प्रणमामि भद्र वनिते मामुद्धरत्वं पशुम् ॥

महाभैरव्युवाच अथ वक्ष्यामि चक्रेन्द्रं शृणु भैरव सादरं येन हीनान सिध्यन्ति महाविद्या वरप्रदा तत् चक्रं ब्रह्मणा प्रोक्तं ब्रह्मचक्रमुदाहृतं यस्य ज्ञानात् स्वयंब्रह्मा स्ववशेननरं सृजेत् अकालमृत्यु हरणं परंब्रह्मपद प्रदं चतुष्कोणे चतुष्कोणं तन्मध्येच चतुश्चतुः मध्यगेहं वेष्टयित्वा ह्यष्ट मन्दिर मुत्तमम् अष्टकोणे महादेव षोडशस्वर मालिखेत् अष्टकोणं वेष्टयित्वा वृत्तयुग्मं लिखेत्सुधीः मध्यगेह चतुष्कोणे कादिक्षान्तञ्च वर्णकम् दक्षिणावर्तयोगेन विलिखेत्साधकोत्तमः तदूर्द्ध्वेऽष्टगृहेचाङ्कं विलिख्य गणयेत्सुधी चतुर्गेह स्योर्द्ध्वदेशे युग्मगेहे क्रमाल्लिखेत साध्यस्य साधकस्यापि मेषादि कन्यकानकम् अधोलिखेत तुलाद्यन्तानि तिराश्यादि कंशुभं ततोलिखेत् गेहदक्षे युग्मगेहेमहेश्वरः तारकानश्विनी तारा धन्ना दक्षिणतोलिखेत् वर्णक्रमेण विलिखेद्वेद मन्दिरमण्डलं ऊर्द्धाधः क्रमतोलेख्य मङ्कभारं सुरेश्वर ततोहि गण येन्मन्त्री योजयित्वा क्रमेणतु सुखं राज्यं धन वृद्धिं कलहं कालदर्शनम् सिद्धि मृद्धिमष्टकोणे विदित्वा च शुभा शुभं गणयेद्राशि नक्षत्रं मृत्यु गेहं विवर्ज्जयेत् सुखे सुखमवाप्नोति राज्ये राज्य मवाप्नुयात्



भद्र चक्रम्

(१३७ पृ० के आगे)


धनेधनमवाप्नोति वृद्धौ वृद्धि मवाप्नुयात धनेधन मवाप्नोति ऋद्धौ ऋद्धिं न संशयः आद्यस्वर युगस्यापि देवता इति राशयः मेषो वृषो मिथुनञ्च कर्कटः सिंह एवच कन्यका देवताज्ञेया नक्षत्राणि पुनः पुनः ऊर्ध्व युग्म गृहस्यापि दक्षवामे च भागके नक्षत्राणि सन्ति पाऽिनतानिश्रृणु महा प्रभो अश्विनी मृगाशिर श्लेषा हस्तानुराधिका तथा उत्तराषाढकातारा पूर्व भाद्रपदा तथा दक्ष गेहस्थिता हारा स्पर्शी भूताश्च देवताः एतासामधिपाएते राशयो ग्रहरूपिणः कर्कटः केशरी कन्या आद्य स्वर युगस्य देवता परि कीर्तिताः एतेषा चापि वर्णाना मधिपाश्चेति राशयः खका रस्य चकारस्य जकारस्य ढकारस्यः दकारस्य फका-रस्य यकारस्य सकारस्यः नकारस्य पतयः ज्ञेयाश्च क्रमशः प्रभो तद्वाम मन्दिर स्स्यापि पतयः क्रमशः श्रृणु रोहिणी पुष्यका तारा तथा चोत्तर फाल्गुनी विशाखा च तथा ज्ञेया पूर्वा षाढा च तारका तथा शत भिषा तारा वाम मन्दिर पार्श्वगाः एता सामधिपा एत राशयो ग्रह रूपिणा मेषो वृषो मिथुनञ्च ईश्वराः परि कीर्तिताः एत द्गेह स्थितं वर्ण मेते रक्षन्ति नित्यशः ककारस्य ङका

रस्य शकारस्य उकारस्यः थकारस्य पकारस्य सका रस्य वकारपः हका रस्याधिपा एते ऋद्धि सौख्य फल प्रदा दक्षिणाद्यो गृह स्यापि देवता इति राशयः तुला च वृश्चिकश्चैव गृहेश्वर उदाहृतः एतासां तारकाणां च पतयोग दिना भरण्यार्द्रा मघा चित्रा ज्येष्ठा श्रवण वल्लभाः तथोत्तर भाद्र पदा वल्लभा राशयो मताः अथो गेह स्थितं वर्ण श्रृणु नाथ मया पहं गकारस्य टका रस्य नका रपः त्नकारशालकाएत राशयः परि कीर्तिताः धन वृद्धि प्रदा नित्या नित्य स्थान निवा सिनः वामाद्यो मन्दिरस्यापि वल्लभा इति राशयः मकारः कुम्भ श्चैव मीनो राशि कुल स्थिताः एतानि भानि रक्षन्ति शूल पाशासि धारिकाः पुनर्वसुः कृत्तिका च तथाभं पूर्व फाल्गुनी स्वाती मूला धनिष्ठा च रेवती रामगेहगाः एता सामधिपा एते जलस्था गृह देवताः एतान् वर्णान् प्र- क्षन्ति गृह स्थान् राश यस्त्रयः घकार जकारस्य कारस्य तथारयः मकारस्य भकारस्य लकारस्य सकारस्यः कल हादि महा दोष काल दर्शन कारकाः राशयो लोक हानाय तन्मन्त्रं परिवर्ज्जयेत यद्येक देवता गेहं विभक्तं

च सुशोभनं चतुः स्थानं युग स्थानं सर्व त्रापि निषेधकम् एक गेह स्थितं मन्त्रं वहु सौख्य प्रदायकं नाभ्र आधा-त्तरं नीत्वा राशि नक्षत्र विस्मृतौ गणयेत् साधक अष्टा कलहे कलहं भवेत् रिपुश्चन्मृत्युलाभः स्यात् कलहेऽसुरे-श्वर कलहं कलगेहं च वर्जयेत प्रयत: सुधीः चक्रोद्धार ञ्च कथितं फलं श्रृणु मुदान्वितः दीक्षाया दिवस नाथ चक्र राजं पक्षान्तिये एहिके धन नाथ स्यात् परेपाति परं पदं नेत्र युग्मं सुरंपाति सिंहोहि कन्य का तथा कर्णे युग्म तुलापाति ऋगयुग्मं वृश्चिको धनुः लूपांम मकरः पाति कुम्भो मीनश्च पातिहि अष्टा च याति च तथा अधरं मेषएव च दन्त युग्मं वृषश्चैव मिथुनं शेषयौ स्वरौ यस्येव थराशय. स्युः तस्य लक्षत शुभं स्मृतम् एक राशि शुभं नित्यं ददात्तिचा सिद्धि भाक् भवेत् भिन्न राशौ वर्ज नीयं कलहं काल दर्शनम् श्रूयतां शैल जानथ चक्रं श्री त्रिदशात्मकम् पूर्व पश्चिम भेदेन षष्ट रेखां समा लिखेत् वामादि दक्षिणान्तं च रेखा दश समा लिखेत् पञ्च गेहे पूरकाङ्कं सर्वाधो हारकाङ्क कम तन्मध्ये रचयेन्मन्त्रं देवता गृह संयुतम पूरकाङ्क माद्य गेहे सप्तर्षि युक्तमा लिखेत तद्दक्षिणे द्वादशं च तद्देत्ते नवमं तथा

तद्दलेष्ट दशकं तद्दले षोडशं स्मृतं पूरकाङ्का तले लिख्या इन्द्रा धांकाश्च दत्तकाः इन्द्र गेहे च शतकं विद्या विद्या फल प्रदम् धर्म्म गेहे शून्य गेहे शून्य सप्त युगलं विलिखेद्बुधः अनन्त मन्दिरे नाथ शून्याष्ट वसुरेव च काली गेहे शून्य खेषु निशापतिं इन्द्राद्योदत्तो लिख्या अंका श्चन्द्राधि देवताः शून्य षष्टं चन्द्र युक्तं सर्वत्र दत्ततो लिखेत् तथा श्विनी कुमारौ च शून्य नल युगात्मकौ तत् पश्चात्सूर्य्य गेहं च सहस्रांक समन्वितं तारिणी मन्दिर स्थांक शून्य वेद षडात्मकम् बगला मुखी गेहस्थं शून्याष्टक चन्द्रसंयुतं ततश्चंद्र गृहस्याधो वायु गेहं मनोरमम रन्ध्र वेदात्मकं गेहं सर्व सिद्धि प्रदाय कम् शिवचक्रंप्रवक्ष्यामि महाकाल कुलेश्वर अवश्यं सिद्धि माप्नोति शिवचक्र प्रसादतः षटकोणमध्य देशेतु चतुरस्रं लिखेद्बुधः तन्मध्यावलिखेत चारु चतुरस्रं सवर्णकम् मस्तकस्थत्रिकोणेषु शिवसंस्थात मन्त्रकम दक्षिणावर्तमानेन गणयेत् सर्वमन्त्रकम् विष्णुस्थाने समन्त्रे च द्वितीये च त्रिकोणके त्रिकोणे च तृतीये च ब्रह्मसंस्थान मन्त्रकम् शक्ति मन्त्रादिसंस्थानं त्रिकोणाधो मुखे तथा नायिकमन्त्र संस्था


ब्रह्म चक्रम् (६)



(१४१ पृ० के आगे)

न तद्वामेदुर्लभं शुभम् स्वरस्थानं तथा वर्णस्थानं श्रृणुमहा-
प्रभो असावर्णद्वयंशैव कवर्गं च सविन्दुकम तदूर्ध्वे च
त्रिकोणेतु भूतसंस्थान पूर्वकम शिवाघोयन्त मन्त्रस्य
संस्थान मतिदुर्लभम् विष्णु ब्रह्मसन्धी देशे पिशाच पद
मन्त्रकम त्रिकोणोपरिसर्वेषां मंत्र संस्थान मेव च नायिका
भूतसन्धौ च कृत्वा सत्स्थान मन्त्रकम् चतुष्ककोण मध्य
देशे महाविद्यपदं शुभम स्वरस्थानम् तथावर्णस्थानंश्रृणु
महाप्रभो अओवर्ण द्वयंशैवे कवर्गं च साविन्दुकम् विष्णौ
नेत्रे चवर्गञ्च टवर्गं ब्रह्मणः श्रुतिम् तवर्गं नासिकां शक्तौ
सर्वमन्त्राथ चेतनम् नायिकायां पवर्गंच ल्रृयुगं परिकीर्तितम्
भूतेयवर्गं विलिखेदोष्टाधर समन्वितम प्रणवंयन्त मन्त्रे च
शकारं परिकीर्तितम् अधोदंतं पिशाचे च संयुक्तं विन्दु
संयुतम शिवबीजं देवमन्त्रे सकारं च साविन्दुकम् महा
विद्यादि संस्थाने लत्तवर्णं प्रकीर्तितं इतितेकथितं शम्भो
श्रृणु व गाङ्ग वर्णनम् शिवेएकाविंशतिश्चद्वात्रिंशाद्विष्णु
कोणके ब्राह्मणेषोऽशाख्यं च शक्ति कूटे युगाष्टकं ना-
सिकायां वन्हिवाणं भूते सप्ताङ्ग मेव न यन्ते च चन्द्रवे-
दञ्च पिशाचे अष्टवसुः स्मृतः सर्वे देवेवदेद्वेदं कृत्पायां

पष्ट पष्ठकम् मध्ये षष्ठहताशाञ्च महात्रिया गृहेशुभे साध-कस्य च साध्यस्य चैकाङ्क मध्य मन्दिरे साधकाङ्कं मूर्द्ध देशेसाध्यार्क गणयेद्बुधः भुजयुग्मंशिवे प्रोक्तं विष्णौरामा-नलं तथा ऋषिचन्द्रं विधौ प्रोक्तं शक्तौ रामाष्टकं तथा नायिकायां वेदबाणां भूतेऽष्टनवमं तथा यक्षयुग्मं चतुर्थी च पिशाचे रन्ध्रकाष्टकं शक्तौ रसक्रतोज्ञेयौ कृत्यायां मुनिषष्ठकं यस्मिन् यस्मिन् गृहस्थाने देवतास्ते महाफलाः स्वनामाक्षर देहस्थ मक्षरं द्विगुणं स्मृतं साध्याके न योज-यित्वा पूरयेत्षष्ठ पंचभिः तद्गेहंसाधयेद्यत्नात् देवताश्वयक्षरं यथा एकगेहस्थितं वर्णकुर्य्याद्वापि विवेचनं शुभंताद्वि विजा-नीयात् विचारमन्यतोऽपि च षष्ठाके न हरे दंकं यदि किञ्चित्तु तिष्ठति आप्तांक मिश्रितं चांकञ्च द्विगुणं देव-तार्णकं पश्चात् कृत्वा तदंकञ्चहरेद्रामेणवल्लभ यदि सा-ध्याकोविस्तीर्णः तदानैव शुभं भवेत् साधकांकोविस्तीर्णो यदिस्यात् ज्ञायते गृहे सदा सर्वकुलेश स्याद्द्रुद्रएव न संशयः द्विगुणं देवतावर्णं साधकांके न योजयेत् वर्णं सख्यांकमालिख्य गणयेत्साधकोत्तमः रसबाणेन संपूर्य्य संहरेद्रससंख्यया पश्चातस्त्रीयाभि धानञ्चाद्विगुणं चापि



शिव-चक्रम

(१४५ पृ० के आगे)

योजयेत् पश्चादनल संख्याभिहरेत् सौख्यार्थमुक्तिये अंक बहुतरंग्राह्यं साधकस्य सुखावह मनग्नाह्य साम्य विस्तीर्ण मितिशास्त्रार्थनिश्चितं विचारादस्य चक्रस्य राज्यत्वंल-भते ध्रुवं रामांकन गृह्णीयात् शून्यांकं वर्ज्जयेदिह अवश्यं भावयेच्चक्रं गोपनीयंसुरासुरैः शिवचक्रं ॥

विश्नुचक्रं प्रवक्ष्यामि चक्राकारं सुगोपनम् सर्वसिद्धिप्रदं शुद्धं चक्रं तु फलप्रदम् शृणुनाथ महाविश्नोः स्थानं मङ्गलदायकम लक्ष्मी प्रियपङ्कमयं नवकोणं महाप्रभं तदूर्द्ध्वे वृत्तमालिख्यतदूर्द्ध्वेऽष्ट गृहं शुभं चतुष्कोण गृहं सन्ध्यामूलाष्टंकं लिखेत्ततः तदूर्द्ध्वेवृत्त मालिख्य चक्रमेत्कुलेश्वर पूर्वे माहेन्द्रभवन मूर्द्धदेशोल्लसत् करं मुनिरामखचन्द्राढ्यपङ्कं सर्वसमृद्धिदं दक्षिणेवन्हि भवनं रस वेदखयुग्मकं तदधोयम चक्रं च सप्तषष्ठखरामकं तदधोनिर्ऋतिगेहं युग्मांक शून्यवेदकम् केवलाधोजलेशस्य मन्दिरं सुमनोहरम रामेषु शून्य बाणाख्यं तद्वामे वायुमन्दिरं भुजहस्तखरसाढ्यं प्राणवायु गतं हितम् तदूर्द्ध्वे प्रीतिदं नाथ गुह्यकेश्वर मन्दिरपञ्च पञ्चस्वसप्ताढ्यं देवतादर्शनप्रदं तदूर्द्ध्वेशेषगेहं च महेशस्यापि मन्दिरं नवमाष्टमखाष्टा चक्राणामीश्वरात्मकम् नवकोणं मध्यदेशे पञ्चांकमग्रतोलिखेत् तन्मध्ये रचयेद्वर्णं पञ्चगेहेत्रिकोणके इन्द्राधोविलिखे द्वीरोप्रणमाद्यं च सप्तकं भागे दक्षिण कोणे च ऋकारादि स्वरंलिखेत् ककारादि टकारान्तं तदधोविलिखेद्बुधः तद्वामेठादिमान्तञ्च वर्णलक्षण कारकम् तदूर्द्ध्वे यादि वर्णं च चक्रं च गणयेत्ततः पूर्व


कोणपतिः शक्रो द्वितीये शौयमानलौनिर्ऋतिर्वरुणश्चैव तृतीय मन्दिरेश्वरः चतुर्थादि पतिर्वायुः कुबेरो नाथ इत्यपि पञ्चगेहस्याधिपतिरीशो विश्वत्रिदाम्बरः एकगेह-स्थितं वर्णं देवतानिजत्रसर्पयोः तदासिद्धिमवाप्नोति विश्नो भक्ति दृढाभवेत तदा न गणयेन्मन्त्री विश्नुचक्रं मनोरमं प्राणोऽपानः समानश्चोदानव्यानौ चवायवः पञ्चकोणे प्रतिष्ठन्ति पञ्चभूताशयेस्थिताः प्राणेस्थिति मवाप्नोति चा पाने चाधिपीडनम् भवेत् समाने सर्वसम्पत्ति रुदाने निधनं भवेत् प्राणेसिद्धिमवाप्नोति व्याने च ईश्वर प्राप्तिरेतस्मिन् लक्षणं शुभम् पूर्वगेहे महामन्त्रमुक्तत्यागं करोतियः स भवेत् साधक श्रेष्ठो विश्नुमार्गे च शङ्कर त्रिशपं श्रगुपलेन सावधानोवधारय सप्ताक्षरं अक्षरञ्च दशमाक्षरमेव च पूर्वगेह यदि भवेद्देदाक्षर समन्वितम् तदा भवतिसिद्धिश्च सर्वमेव प्रकारकम् षष्टाक्षरं देववर्णं विंशत्पर्णं महामनुं आम्रामा माद्यक्षरव्याप्तं सत् फलं गणयेद्बुधः तथा-स्मिन् यमगेहे च मन्त्रं सप्ताक्षरं शुभम् षष्ठाक्षरञ्च गणयेत् त्रिंशदक्षरमेव च आद्यान्तरसमायुक्तं साध्यसाधक योरपि एकस्यापिच लाभे च मन्त्रसिद्धिरखण्डिता मन्त्रा-

न्नरादि लाभञ्च अवश्यं गणयेदिहनैर्ऋते च जलेशस्य।-
ग्रन्तरञ्चनवान्नरम् शून्यं वेदान्तरंनाथ गणयेचविचन्नणः
अथात्रअन्तरं मन्त्रं पञ्चान्तरमनुं तथा पञ्चदशान्तरं मन्त्रं
मन्दिरेगणयेत् शुभं वायुकोणे कुवेरस्य मन्दिरेगणयेत्तथा
द्वाविंशत्यन्तरं मन्त्रं शून्यं षष्ठ मनु तथा पञ्चान्तरं तार-
कायाः शिव पञ्चान्तरं तथा खमन्तमन्त्र ग्रहणे सफलं
परिकीर्तितं ईशान पञ्चकोणे च सफलं च नवान्तरं
अष्टान्तरं हि विद्यागणयेत् स्वहितं सुधीः एतदुक्तं च
गणयेत् विरुद्धं नैवशीलयेत् प्राणमित्रं समानञ्च समाने
ष्पानबान्धवः एतत् स्थितञ्च गृह्णीयाद्दोषभाक् न भवेत्
कचित् एकदैवपतौ प्रीतिरेकगेहेतथाप्रियम् गृहीत्वा विश्नु
पदवीं प्राप्नोति मानवः न्नणात् यदि चक्रं न विचार्य्य
रिपुमन्त्रं समभ्यसेत् निजायुष्यं छिनत्येव मूकोभवति
निश्चितम् विचार्य्य यदि यत्नेन सर्वचक्रमिपं हितम्
महामन्त्रं महादेव लघुसिद्धयति भूतले इति श्रीरुद्रयामले
उत्तरतन्त्रे महातन्त्रोद्दीपने सर्वचक्रानुष्ठाने सिद्धमंत्रप्रकर्णे
भावानिर्णये भैरवी भैरव संवादे चतुर्थः पटलः।
मानुषीषसहोद्भवा वर्ज्जयेत्पञ्च नन्नत्रं तृतीयं जन्मसप्तकम्

दसाष्टनवभद्राणि युग युग्मगतान्यपि यदीह निज नक्षत्रं न जानाति द्विजोत्तमः नामाद्यक्षर सम्भूतं स्वतारम विरोधकम् विनीय गणयेन्मन्त्री शुभाशुभ विचारत्वान् आदान्तिरये न गणयेत् साधकाद्यक्षरात् सुधीः इत्येतत्कथितं नाथ ममात्मापुरुषेश्वर कुलाकुलमनन्ताख्यं ताराचक्रं मनोगुणं तारामंत्र प्रदीपाभं रत्न भाण्डस्थितामृतं विचारे चास्य महती सिद्धिरानन्द वर्द्धिनी ।

नक्षत्र चक्रम् ।

अश्विनी अश्रा	भरणी इनरः	कृत्तिका इउऊ राक्षसः	रोहिणी ऋॠऌ ॡनरः	मृगशिरा एदेवः	आर्द्रा रोनरः	पुना० ओऔ दे०	पुष्य क दे०	अश्ले० खग राक्षसः
मघा घङ राक्षसः	मर्वाशणाङ चनरः	उत्तराफा० छज नरः	हस्तझञ देवः	चित्रा टठ	स्वाति उदेवः	वि० ढण रा०	अनु० तथ दनर	ज्ये० धरा क्षसः
मूला नपफ राक्षसः	पूर्वाखाठा वनरः	उषाभरा	श्रवण मदेवः	राक्षसः धनिष्ठापर राक्षसः	शतभिषाल राक्षसः	पूभा० वश नरः	उ०भा वसह नरः	रे अअन्त क्ष दे०




(१५१ पृ० के आगे)

· राशिचक्रं प्रवक्ष्यामि सिद्धिलक्षण मुत्तमम् क्रमेणे देयायुगला रेखा पूर्व परोपगा तन्मध्यतोद्वयंदद्यात् रेखो दगदक्षिणाततः अग्निनैऋतवायवी शक्रमेण वेद रेखया विलिखेतं मेषराश्यादि मीनां तं सर्व वर्णकम् क्रमेण विलिखेत द्वीर राशिचक्रे च साधकः वेदरामं रामहस्तं भुजंलोचनमेवच पंञ्चभूतं पंञ्चभूतं पञ्चवेदादिवर्णकान् कन्या गृहगतानशादि वर्णनालिख्यत्नतः गणयेत् साधक प्रेष्टोलग्नाद्यायव्ययान्तकान् स्वराशि देवकोष्टानामनुकूलात भजेन्मनून् राशिनां शुद्धताज्ञेया त्यजेच्छत्रंमातिंव्ययम् स्वराशेमिन्त्रराश्यन्त्रे गयानीयंविचक्षण साध्याद्यक्षर राश्यन्त्तं गणयेत साधकाक्षरात एकं पञ्चम नवमंबान्धवं परिकीर्तिताः रामरुद्राश्चमुनयः येषका परिकीर्त्तिताः सुर्य्याष्टवेद युक्तास्तुघातका सर्वदोषदाशक्त्या दोतुमहा देव कुल चूडा मणिर्यतिः वर्ज्जयेत षष्टगेहंच अष्टम द्वादशं तथा लग्नं धनंभ्रातृबन्धू पुत्र शत्रुकलत्रकाः मरणं धर्म्मकर्म्माय व्ययाद्वादश राशयः नामानूरूपमेतेषां शुभा शुभफलंदिशेत् वैष्मवेतु महा शत्रोः स्थानेवंधु प्रकीर्तितः

कुर्म्मचक्रं प्रवक्ष्यामि शुभाशुभ फलात्मकं यं ज्ञात्वा सर्वशास्त्रार्थं जानाति पण्डितोत्तमः अभेद्याभेदकं चक्रं शृणु सादरपूर्वकम् कूर्माकारं महाचक्रं चतुष्पादसमावृत्तम् तुण्डेस्वरादक्षपादे कवर्गं वामपादके चवर्गः कीर्तितः पश्चादधः पादे टवर्गकः तदधस्तु तवर्गः स्यात् उदरे च पवर्गकम् यवान्तं हृदये प्रोक्तं सहान्तंपृष्ठ मध्यके लाङ्गूले-शक्रबीजं च लकारं लिंगमध्यके लिखित्वागणयेन्मन्त्री च चक्रंकलिमला पहम् ॥

स्वरेलाभं कवर्गे श्रीश्चवर्गे च विवेकदम् टवर्गेराज-पदवीं तवर्गे धनवान् भवेत् उदरे सर्व्वनाशः स्यात् हृदये हृदु:खदम् पृष्टे च सर्व्वसंतोषं लांगूलेमरण ध्रुवम् वैष्णवे पृष्ठेशेतु दुःखंच वाम पादके विरुद्धद्वयलाभेन कुर्य्यात् चक्र चिन्तनम् विरुद्धैके धर्म्म नाशो युग्मदोषे च मारणं पत्रदे-वाक्षरश्चास्ति तत्र चेत्निजवर्गकं विरुद्धं चेत्यजेत् शत्रुमन्त्र मन्त्रं विचारयेत् पृथक् स्थाने यदिभवेद्वर्णमाला महेश्वर यादिसत् सत्यभावःस्यात तत्रोक्यंनापि वर्ज्जयेत् विभि-न्नगेहेदोषश्चेशुभमन्त्रं च संत्यजेत् इतितेकथितं देव दृष्टा दृष्ट फलप्रदम्ये शोधयन्ति चक्रेन्द्रंमन्त्रसिद्ध प्रदं शुभं ॥

कूर्मचक्रम्



(१५२ पृ० के आगे)

राहुगेहं महापापं शून्ये शून्यमुनिप्रियं दश्चादर्कं गृहस्थं च खशून्य युगलात्मकम् षोडशी मन्दिरे शून्यरन्ध्र चन्द्रसमन्वितं वायोरधोवरुणस्य गृहं सप्तशशिप्रियं तरुणी मध्यगेहे च शून्याष्टक समन्वितं बुधगेहास्थिताङ्कञ्च शून्य चन्द्र युगात्मकम् भुवनेशीमन्दिरस्थं शून्यषष्ठ शशिप्रियं वरुणाधः कुबेरस्य गृहस्थं षट्युग्मकं आनन्दभैरवीगेहे दशकं परिकीर्तितं धरणी गृह मध्ये च शून्ययुग्मेन्दु संयुतं भैरवीगृहमध्यस्थं शून्ययुगल चन्द्रकं बाणीगृहस्थं शून्यार्ष-ञ्चन्द्र मण्डलसंयुतं कुबेराधोमुखं चक्रास्थिताङ्कं सर्वसिद्धि-दम ईश्वरस्य गृहस्थं च सप्त शून्य युगात्मकम तिरस्कर-णी गेहस्थं सहस्राङ्क समन्वितं किङ्कनी मन्दिरं पश्चात् अष्टै चन्द्रै समन्वितं छिन्नमस्ता गृहपश्चात शून्याष्ठ चन्द्र मण्डलं वागीश्वरी गृहपश्चात खसप्तचन्द्र मण्डलं महाफल प्रदातारं धर्मंत्वराति तस्यन ईश्वरस्य अधोगेहे वटुकस्य गृहं ततः शून्याष्टमाढ्यं स्वगृहं धर्म्मार्थ काममोक्षदम् तत् पश्चाड्डाकिनीगेहं खशून्यमुनि संयुतं हन्तिसाधक मुख्यं हि क्षणादेव न संशयः स्वगृहे स्त्रीयमन्त्रस्य फलदं परिकीर्तितं भीमादेवीगृहं पश्चात् खसप्त चन्द्रमण्डलम् भयदं सर्वदेशे-

तुवर्जयेत्तुगृहान्तकम् लन्त्ववर्णांलिखेत्शेष गृहे वै परिट- तोत्तमः इन्द्रगेहावाधि धीरः ककारादिक वर्णकम् चकारान्तं लिखेत्तत्र गणयन् साधकस्ततः पूरकाङ्क मूर्द्धदेशे हारकाङ्क मधो मधोलिखेत् निजनामाक्षर यत्रतत कोष्टाङ्कमेहश्वर नीत्वा च पूरयेद्विद्वान् स्वरगेहोर्द्धदेशगैः अङ्कैस्ततो हरेन्नाथ अधोऽङ्केहार्थ शेषकं विस्तरं चेद्दैवताङ्कं तदङ्क शुभदःस्मृतः अल्पाङ्क शुभदः प्रोक्तः साधकस्य शुभावहः एकाक्षरे महेत्सौख्यं तत्रापि गणयेन्न च स्त्रीयाङ्क शून्यगामी चेद्दैव ताङ्क स्तथाप्रभो तदानैव शुभंविद्यात् न शुभाय प्रकल्पते एके धनमवाप्नोति द्वितीये राजवल्लभः तृतीयेजाप्य सिद्धिः स्यात् चतुर्थे मरणं ध्रुवम् पञ्चमेपञ्च बाणस्स्यात् षष्ठे दुखोत्कटानि च शैवानां शाक्तवर्गाणां इत्यङ्कः परिकीर्त्तितः वैष्णवाना निषेधैकं पञ्चमाङ्को निषेधकः येषां देवतानां इच्छातिष्ठति चेतसि तन्मन्त्र गृहणादेव अष्टैश्चर्य युतो- भवेत् यद्देवताश्रिता येतु तद्गृहांक हरंतिते ऊर्द्धांकेन पूरयित्वा अधोङ्कं न हरेत्सदा ॥

दैव चक्रम्

१९	१८	६	१२	७
धूमावती ङ।०।०।५।१	काली प ०।१२।३	अनन्त ग ०।८।८	धर्म्मः ख ०।०।२	इन्द्रः कः १००
बगलामुखी ञ ०।८।१	तारणी र ०।४।६।	सूर्य्य ज	अश्विनी कुमार छ ०।३।२	चन्द्र च ०।६।१
मातङ्गी ण ०।८।१	षोडशी ढ ४।६।१	अर्का ड ०।०।२	राहुः ठ ०।०।७	वायुः ट ०।८।४
प्रत्यङ्गिरा न ०।६।१।	भुवनेशी ध ०।८।१	वधूः द ०।१।२	तरुणी थ ०।८	वरुण त ७।१
बाणी म	भैरवी भ	धरणी व	अग्नि फ	कुवेर प ६।२
बागीश्वरी श	छिन्नम- स्ता व	किंकनी ल	तिरस्क- रणी र	ईश्वरी य
क्ष	ल	भीमादेवी ह	डाकिनी स	वटुक ष
१९	१८	६	१२	७

ऋणि धनि महा चक्रं वक्ष्यामि शृणु तत्वतः दर्शना देव कोष्टस्य जानाति पूर्व जन्म गम्र देवं बहुतराङ्कस्थं ज्ञात्वा सिद्धीश्वरो भवेत निज सेव्यां महा विद्यां गृहीत्वा मुक्ति माप्नुयात् कोष्ट शुद्धं च मन्त्रञ्च ये गृह्णं तिद्विजो-त्तमाः तेषां दुःखानि नश्यन्ति ममाज्ञा वल्ल वत्तरा कोष्ट शुद्धं महा मन्त्रं फलं यच्छाति भैरव न दातव्यं सदा मन्त्रं फलं यच्छाति भैरव न दातव्यं सदा मन्त्रं सद्गुरु प्रिय दर्शनात् तत्र कोष्टं न विचार्य्य चेज्जानाति विचार्य्यकं महा विद्यां महा मन्त्रं विचार्य्य कोटि पुण्य भाक अत्रि-चारे प्रोक्त फलं ददाति काम सुन्दरी कोष्टान्ये का दशा-न्येव वेदे न पूरि तानि च अकारादि हका रान्तं लिखे-त्कोष्टेषु तत्वात्रित् प्रथमं पञ्च कोष्टेतु ह्रस्व दीर्घ क्रमेण च द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः शेषेष्वेकै कशोवर्णान क्रम तस्तु लिखेत् सुधीः अ आ वर्णद्व यस्योर्द्धा वधिस्तु क्रमशोऽकक: आद्य मन्दिरमधेतु षाष्टङ्कं विलिखेद्बुधः द्वितीये षष्टचिन्हञ्च तृतीये च गृहे तथा चतुर्थ गगनाङ्कं च पञ्चमे च त्रयं तथा षष्ट गेहे चतुर्थञ्च सप्तमे च चतुर्थकम् अष्टमे गगनाङ्कं नवमे


दशमे तथा शेष मन्दिर मध्ये तु ऋयंक्कं विलिखे ततः एते नाथ साध्य वर्णाः कथिताः क्रमशो ध्रुवम् कथयामि समं कारण सकलार्थ निरूपनम् आद्य गृहे द्वितीयञ्च द्वितीय कम् तृतीये पञ्चमं प्रोक्तं गगनं वेद पञ्चके षष्ठ युगल मेवं हि सप्तमे चन्द्र मण्डलं अष्टमे गगनं प्रोक्तं नवमे च चतुर्थकं वेदं च दशमे प्रोक्तं चन्द्र मेकादशे तथा साध कानां स्मृता एते वर्ण मण्डल मध्यगाः साध्य वर्णान्महा देव स्वरव्यं जन भेदकान् एवंहि सर्व मन्त्रांकान षष्ठाद्यङ्कैः परि पूरयेत् एवं ऋत्प हरे दष्ट संख्याभि कुल वल्लभ यद्गेह स्थितं वर्णं तन्त्रे तव्यं मनौ शुभे साधका भिधान वस्मान् स्वर व्यञ्जन भेद कान् पृथक पृथक संस्थितां श्च व्यक्तं शृणु पुनः पुनः द्वितीयाद्यङ्क चन्द्रान्तैःसंपूर्य्या-ष्टाम राहरेत् मन्त्रो यद्यधिकांकः स्यात् तदा मन्त्रं जपे-त्सुधीः समेऽपि च जपेन्मन्त्रं न जपेतु ऋणाधिके शून्ये मृत्युं विजानीयात् तस्माच्छून्यं विवर्जयेत् द्वितीयाद्यङ्क जालञ्च वैष्णवे शुभदं स्मृतं द्वितीयाद्यङ्क जालंच तथा चैव प्रकीर्तितम् इन्द्राद्यङ्कं तथा नाथ शैवे शाक्ते शुभ प्रदम् तथाधिक संख्यका द्यङ्क साध कस्य शुभ प्रदं तदङ्कं शृणु

यत्नेन पूर्ववत सकलं स्मृतम् स्थानैश्चैव विभिन्नाङ्क मूर्ध्वा-
धश्च क्रमेण च साध्याङ्कान् साधकांश्च पूरयेद्‌गृह संख्यया
गुणिते तु हृतेष्टा भिर्यत् शेषं जायते स्फुटं तदङ्क कथ
याम्यत्र एका दश गृह स्थितं इन्द्र तारा युग वार तिथि
षड्वेद दाहनाः अष्ट वसुनवाङ्कस्थाः साध्यार्णा गुणिता
इति दिग्भू गिरि श्रुति गज वन्हि पर्व्वत पञ्चमाः वेद
षष्टान लाङ्काश्च गणयेत् साधका क्षरान् नामाद्यक्षर
मारभ्ययावन्मन्त्रादि मात्तरम् त्रिधाकृत्वा स्वरैर्भिन्नं
तदन्यद्विपरीतकं कृत्व शेषाधिकं ज्ञेयं ऋणं शेषं धनं
भवेत् साधकाक्षर मारभ्ययावन्मन्त्रा क्षरं भवेत तत्संख्यं
च त्रिधाकृत्वा सप्तभिः संहरेद्‌बुधः अधिकं च ऋणं प्रोक्तं
तत् शेष धन मुच्यते अथवान्य प्रकारश्चकृत्वा मन्त्रं समा
श्रयेत मन्त्राद्यक्षर मारभ्ययावत्साधक वर्णकम् ता-
वत्संख्यं सप्त गुणं कृत्वा रामैर्हरेद्बुधः श्रीविद्येतर विद्या
यां गणना परि कीर्तिता अथवान्य प्रकारञ्च सकलान्
साधका क्षरान् स्वर व्यञ्जन भेदेन द्विगुणी कृत्य
साधकः साध्य युक्तं ततः कृत्वा स्वर व्यञ्जन भेदकम्
अष्टभिः संहरेदर्कं शृणु संहार विग्रह पूर्वोक्त माचरेत्

सर्वत्रापि शुभाशुभम् अस्य विचार मात्रेण सिद्धि सर्वार्थ साधिका पूर्व जन्मा राधितायां तां प्राप्नोति हि देव ताम्

अथान्यत्तं प्रवक्ष्यामि साव धानो वधारय उल्का चक्रं सर्ब सारं मन्त्र दोषादि निर्णयं मत्स्याकार मूर्द्ध मुखं सर्ब मन्त्रादि विग्रहम् स्कंध देशा वधि नाथ पृष्ट पर्य्यन्त मेव च एका त्तरादि मन्त्रादि द्वादशा त्तराधिकम्

आनन्द भैरवउवाच—ज्ञानेश्वरी शुभकरी परिभाव-
नीया योगेस्वरी शुभकरी परिभावनीया योगेश्वरैर्ह-
रिहरैर्गुरुभिर्महेन्द्रैः तांकाकिनी जननीं परमेशपत्नीं
संस्तौमिचारुहृदयाम्बु जपीठमध्ये एकाकिनीं निजगतां
मतिनाशकाले तां काकिनीं समरवारण कालपत्नीम् त्वं
साक्षिणी भुवनभंगविधौतुकान्ते भ्रूणांतु काकमहिषीं वरदां-
भजामि २ एकाकिनीं सकलधारण कालयोगे आधार्य्य
देहसमये सतिकाकिनींत्वाम् वाय्वासनेमनस आशुविकार-
नाशे काकेन्द्र चंचुलचलिता महमवसीडे ॥३॥ भावोदये
प्रणयिनीं भवदुर्गतौ च आल्हाद योगाविभवे भुवनेश्वरी-
ताम् मन्दारहार रुचिरे परमेश्वरीत्वं रक्षां कुरु प्रथमभास्कर
माश्रयामि ४ चन्द्रोदये सुखपदींद्युति कोटिदीप्ता गोप्या-
गमे सुमतिभिः सुमनांसिश्रद्धा सात्वं सुखानुभव भावविपू-
जनीये रक्षांकुरु प्रथम भास्कर माघीमीडे ५ ते पादपंकज
मसमहं भजामि सानन्द विन्दुविमलासन भाव पुञ्जे
गुञ्जावटी विमलमाल्य सुशोभिताङ्ग श्यामेवतारञ्च रम
भाव समूहदात्री ॥६॥ पञ्चानने दशभुजे कमलास्त्रयुक्ते
विद्येऽभयेभयहरे नरहारभूषे प्रेतासनेत्रिनयने जननीत्वमेव




अकडम चक्रम्

(१५६ पृ० के आगे)

रक्षेहते चरण पंकजमागयामि ॥७॥ श्रीसुन्दरि प्रणतरक्षिणि देवमातः तारेश्वरीत्व ापि रक्ष विनाशकाले पद्येकमथन इतिहास पुराणवक्ता नित्यानुरक्त इहपादसरोजमीडे ॥८॥ ते श्रीपदं भुवनसार मनन्तसेव्यं योगास्पदं कृतिभिरा-श्रय मेक योगम् सर्वे भवन्ति निजमोक्ष फलायनित्यं दीनोहमम्ब श्री मुदाश्रयामि ॥ ९ ॥ त्रैलोक्यपूजित पदं हृदयाम्बुजस्थं चित्तप्रकाशकमशेषसुखानुभूतं मायाश्रयं सकलसिद्धि निदानरूपं मञ्जीर हारानिरतं वराश्रयामि ॥१०॥ कोटीरहार कमलप्रियमाल्य शोभे शोभाकरे स्थिरतरा भवमेहृदञ्जे भूमण्डले हि बलवानकृतकृत्य एवं त्वामीश्वरीं हृदिमुदासुखमाश्रयामि । नित्ये पुराभजाति योगसुसिद्धयेसौ शम्भूरगिरीश इतिचेश्वरगामी देवीसायुज्य नाथ पदवीं गतईशकान्ते एकाकिनीं कुलवतांघ्रियुगं किमन्यैः ध्यायन्ति योगिन इहाघसमूह शैल संहारहेतु रवि-कोटि प्रभाव भासां वित्तोत्सवाय विभवाय जयायभूमे दीनोऽहमाश्र विभजामि पदंश्रीयस्ते कृष्णेसिते विमलपीत निर्मले वर्णाश्रमेत्वम मदावतुदीनमेकं पुत्रंतवैव चरणाम्बु जसेवकंतं नीलाम्बुजे स्थिततरे कुरुकामदात्री ॥ १४ ॥

सर्वेश्वरी प्रियकरी भवभारहन्त्री नानाध्वनि प्रणतकाम दुघेविचित्र रत्नाम्बरे सुखपदे यदि देहि दास्यं त्वं चारुवर्ण-गलिते पदमाश्रयामि ॥१५॥ रत्नाकरेसकरुणेऽरुणकोटि-वर्णे स्वर्णादि निर्मित स्रजा परिशोभितांगी त्वंकाकिनी यदिकटाक्षनिपातमेकं सर्वेकुरुष्वखलुमोक्ष पदानुमोदी ।१६। आद्य प्रवाल विमलेऽमल माल्यशोभे मूर्च्छेतिमूर्च्छा निकरे करुणानिधाने बालेऽबले प्रचपले चमले प्रतापे योगेशि पादकमलं कुलमाश्रयामि ॥१७॥ श्रीषोडशीखर तराखर खड्गहस्ते खण्डेश्वरि प्रखरत्वात्रय मुखाब्ज्यवक्त्रे खर्जूर हाररुचिर खलहन्तितुभ्यं नित्यं नमोनमउपेन्द्र सेव्ये १८ गीतागते गुरुतरे गर नाशिनीत्वं गात्रेश्वरी गतिहरे गण-नाथ सेव्ये सदैव गायन्ति ते चरण पंकज सारगीतं रक्ष प्रचण्ड कलुषादनु पेक्षणीयं ॥१९॥ दीर्घस्वरे घनरवे घन घोरनादे घोराननेे नवघने पटले घनानां घोरास्पदे घटगते घटशून्य वर्त्री त्वेकाकिनी सपत्रत्रुटिति दोष जालात् ॥२०॥ आनुस्वरे तनुरूपविधे संयोगिनि प्रबल शत्रु विनाशभूते रक्षेति रक्ष करुणां कुरुदेहिमोक्षं चंडि प्रचण्ड नयने चरणं भजेते ॥ २१ ॥ छत्रप्रदे छलहरे छद्मवासि-

अकडम चक्रम



(१६२ पृ० के आगे)

नीत्वं छग्नछिते हृदयपंकज छग्नयोगे त्वां पूजेप जयधरे यदुनाथजन्ये जायेजयं यदि विदेहिपदं भजामि ॥ २२ ॥ झेंझे झलन झलदितीह रिपुं पिवन्तीं त्वंकौशिकी सकल देह विशोधिनीत्वं नित्यं नुनासिर.करे सकलार्थ देत्वे रत्वां कुरुष्वविपदे कुलपुंजगुंजे॥२३॥ टंकारगेऽट्टहसने अट्टहास टंकारिणी शठतया परिनिष्टतात्वम् सिंहेष्ठपृष्टानिलये स्थिर योगभावे हृतपंकजे कुरुसदा सकलार्थ दात्रि ॥२४॥ एतत् स्तोत्र पठेद्विद्वान् ध्यानन्यासपरायणः त्रिभाव्यस्तोति योगीशः सयोगी मोक्षभाग्भवेत् हृद्रूपं केरुहमध्यस्थे सपश्यति जगत्त्रयम् अष्टसिद्धियुतः शीघ्रे जीवन्मुक्तो भवेन्नरः (५.९ प०)।

ओं


आनंद भैरव उवाच—ज्ञानेश्वरी शुभकरी परि भाव-नीया योगेश्वरैर्हरि हरैर्गुरु भिर्महेन्द्रैः तां काकिनीं च जननीं परमेश पत्नीम् संस्तौमि चारु हृदयाम्बुज पीठ मध्ये ॥ १ ॥ काकिनीं त्रिजगता मति नाश काले तां काकिनीं समर वारण काल पत्नीम् त्वं साक्षिणी भुवन भंगावि धौतु कान्ते भूपांतु काक महिषीं बर दांभ जामि ॥ २ ॥ हा काकिनीं सकल धारण काल वेगो आश्चर्य देह समये मति काकिनीं त्वां वायवासने मन स आश्र विकार नाशे काकेन्द्र चञ्जु चलिता मह मेवमीडे ॥ ३ ॥ भावो दये प्रणयिनीं भव दुर्गतौ च आल्हाद योग विभवे भुवनेश्वरीं तां मन्दार हार रुचिरे परमेश्वरी त्वं रक्षां कुरु प्रथम भास्करमाश्रयामि ॥ ४ ॥ चन्द्रो दयेसुखम यिधुति कोटि दीप्ता योग्यागमेनुमती श्रीभिः सुमनां सिश्रद्धा सात्वं सुखानुभव भाव विप्रजनीये रक्षां कुरु प्रथम भास्कर मंघ्रिमीडे ॥ ५ ॥ तेपादपङ्कज मजस्त्र महं भजामि सान-न्द विन्दु विमला सन भाव पुञ्जे [गुञ्जावटी विमल

मालव सुशोभिताङ्गे श्यामेव तामरवे भाव समूह दात्री ॥ ६ ॥ पञ्चानने दश भुजे कमला स्त्रयुक्ते त्रिवेऽमये अय हरे नरहार भूषे प्रेतासने त्रिनयने जननी त्व मेव रक्ते हते च रण पङ्कजमाश्रयामि ॥ ७ ॥ श्री सुन्दरी प्रणति रत्नाणि देव मातः तारेश्वरी त्वमपि रत्न विनाश काले यद्येक भक्त इतिहास पुराण बक्ता भित्यानु रक्त दहपाद सरोजमीडे ॥ ८ ॥ ते श्री पदं भुवन सार मनन्त सेव्यं योगास्पदं कृतिभिराश्रय मेक योगं सर्वे भजान्ति निज मोक्ष फलाय नित्यं दीनोहमम्ब भुवनेशि मुदाश्रयामि ॥ ९ ॥ त्रैलोक्य पूजित पदं हृदयाम्बुज-स्थं चित्र प्रशाक मशेष सुखानु भूतं मायाश्रये सकल सिद्धि निदान रूपं मञ्जीर हार निरतं वर माश्रयामि ॥ १० ॥ कोटीर हार कमले प्रिय मालव शोभे शोभा कोर स्थिरतरा मन मञ्च हृदब्जे भूमण्डले हि बलवान कृत कृत्य एव त्वा मीश्वरी हृदि मुदा सुख माश्रयामि नित्ये पुरा भजाति योग मु सिद्ध येसो शंभुगिरीश इति चेश्वर गामी देवी सा पुज्य नाथ पत्नीं गतदेश कान्ततां काकिनीं कुल वतांध्रि युगं किमन्यैः ध्यायन्ति योगिन

इहाद्य समूह शल संहार हेतु रवि कोटि प्रभाव भांसा त्रित्तौत्मवाय विभ वाय जयाय भूमेर्दीनोह मम्ब भजा मि पदं श्रिय; २ने कृष्णा ि विमल पीत निभे समेते वर्णा शमेत्वम मराव तुदीन मेकं पुं तथैव चरणाम्बुज सेवकं ते नीलाम्बुजे स्थिल तरं कुरु काम दात्री ॥ १४ ॥ सर्वे-श्वरी प्रिय करी भव भ र हन्त्री नाना ध्वनि प्रणत काम दुघे वि चित्रे ग्लाम्बरे सुख पदे यादि देहि दास्यं त्वचा स्ववर्ण गन्विते पद्माश्रया मि ॥ १५ ॥ रत्ना करे रुक रुणेऽरुण कोटि वर्णे स्वर्णादि निर्मित स्रजा परि शोभिताङ्गी त्वं काकिनी यादि कटाक्ष निपात मेके सर्वेकु-रुष्व खलुमोक्षयदानु मोदी ॥ १६ ॥ आद्य प्रवाल त्रिमलेऽमल माल्य शोभे सूक्ष्मोति सूक्ष्म निकरे करुणानि-धाने बालेऽले प्रचपले त्वमले प्रलापे योगे शि पाद कमले कुलमाश्रयामि ॥ १७ ॥ श्रीपो दशी खर खरा खर खड्ग हस्ते खण्डेश्वरि गखर वाक्य मुखाढ्य वक्रे खर्जुर हार रुचिरं खल हन्ति तुभ्यं नित्ये नमो नमः उपेन्द्र सदैव सेव्ये ॥ १ ॥ गीता गते गुरु तरंगरनाकीनी त्वं गाङ्गेश्वरी गाति हरे गण नाथ सेव्ये गायन्ति ते चरण

पङ्कज सारंगी ते रक्ष प्रचण्ड कलुषादन पेक्ष पीये ॥ १९ ॥ दीर्घ स्वरे घन रवे घन घोर नादे घोराननेनव घने पटले घटानां घोरास्पदे घट गते घट शून्येन गन्धी त्वं काकिनी सभवतु क्षिति दोप जालात॥२०॥आतुर च रतेन रूपविद्ये संयोगिनी प्रबलशत्रु विनाशभूते रक्षेति रक्ष करुणां कुरुदेहि मोक्षं चंडी प्रचण्डनयने चरणाम्बु जेत रीछत्रमदछलहरे छद्मगामिनीत्वं छद्मछिते हृदयपंकज छद्मयोगेत्वां पूजये जपधेर पदनाथ जन्ये जायेजयं यादि-विदेह पदंभजामि २२ झंझे झज्जन झज्जुदितीह रिपुंपिवन्ती त्वंकौशिकी सकलदेह विशोधिनीत्वं नित्येनुनासिककरे सकलार्थ देत्वं रक्षांकुरुष्वविपदे कुलपुञ्जगुञ्जे २३ टंकागेहहसेन ऽत्नऽट्टहासे टंकारिणी शठनया परिनिष्ट-तात्वम्२४ एततस्तोत्रं पठेद्विद्वान् ध्यानन्यासपरायणः त्रिभा-व्यस्तोतियोगीशः सयोगी मोक्षभाग्भवेत् हृद्पङ्के-रुह-ध्यस्थ स पश्य जगत्रयम् अष्टसिद्धि युत शीघ्रं जीवन्मुक्तो भवेन्नरः ५ । ६ ५० ।

कैलास शिखरासीनं देवदेवं जगद्गुरुं शंकरं परिपप्रच्छ पार्वती परमेश्वरं॥१॥ पार्वत्युवाच—भगवन्देव देवेश देवानां भोगदप्रभो ॥२॥ परमैश्वर्यं मतुरो लभेयेनहितद्वद भैरव उवाच प्रवक्ष्यामि सुधादेवी सर्व धर्मविदांवरे अद्भुतं कवचं देव्याः सर्वकाम प्रसाधकं विशेषतः शत्रुनाशं करं नृणां सुखावहं ॥४॥ सर्वारिष्ट प्रशमनं प्रतिवाद विनाशनं सुखदंभोगदं चैव वशीकरण मुत्तमं शत्रु संघात्त्वंयाति भवेति व्याघ्र पीडितः दुःखिनोज्वरिणश्चैव स्वाभीष्ट प्रच्युतास्तथा ॐ अस्य श्री कालिका कवचस्य भैरवऋषिर नुष्टपछंदः श्रीकालिका देवता शत्रु संघविदारणे विनियोगः ॐ ध्यायेत्कालिं महामायां त्रिनेत्रां बहुरूपिणीं चतुर्भुजां ज्वलज्जिव्हां पूर्णचन्द्रानिभाननां नीलोत्पलदलप्रख्यां शत्रु संघविदारणीं नरमुंड तथा खड्ग कर कालवरे तथा त्रिनेत्रां रक्तवदनां दृष्टाढीं घोर रूपिणीं अट्टाट्टहास निरतां सर्वदा च दिगंबरांशवासन स्थिता देवीं मुण्डमालाविभूपितां इति ध्यात्वा महाकालीं ततस्तु कवचंपठेत कालिका घोर रूपाय भासर्वकाम प्रदाशुभा सर्वदेवस्तुते देवि शत्रुनाश करोतमे ॐ ह्रां ह्रीं स्वरूपिणी चैव ह्रां ह्रीं स्वरूपिणी



१६७ पृ० के आगे·

तथा ॐ ह्रां ह्रीं ह्रौं ह्रैं स्वरूपासामदा शत्रून प्रणाशस्तुने ॐ श्रीं ह्रीं रीं स्वरूपणी देवी भवबंध विमोचनीं हिंसक ह्रीं सकल ह्रीं रिपून हिंसतुसर्वदा यथाचमोहता दैत्यो निशुंभ श्चमहासुरः वैरिनाशाय वंदेता कालिकां शंकरप्रियां ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहका कौमारी इंद्री चामुण्डा खादन्तु ममविद्विषः सुरेश्वरी घोर रूपाचंड मुंडविनाशनी मुण्डमाला हृताङ्गी च सर्वतः पातुमांसदा ॐ ह्रां ह्रीं कालिके घोररूपे घोरदंष्टे रुधिरप्रिये रुधिर वक्रे रुधिरा नृतस्तनी ममशत्रून् खादय खादय हिंसय हिंसय मारयमारय भिंदि भिंदि छिंदि छिंदि उच्चाटय उच्चाटय द्रावय द्रावय शोषय शोशय स्वाहा ॐ रां रीं कालिका येनदीय शत्रून् समर्पयामि स्वाहा ॐ क्रिरि कटकट मर्दय मर्दय मोहय मोहय हरहर ममारिपून परिध्वंसय ध्वंसय भक्ष भक्ष त्रोटय त्रोटय यातुधानेचा मुंडे सर्वजनान् राज्ञौ राज्ये पुरुषान स्त्रियो मम वश्यान् कुरु कुरुतनुतनु धान्य धन मश्वान् गजेंद्रा नरत्नादि दिव्यकामिनी पुत्रान् श्रियंदेहि यच्छ यच्छ ह्रां ह्रीं क्षूं ह्रैं ह्रौं ह्रः स्वाहा एतत्तु कवचोदिव्य कथितं शंभुनापुरायं पठंतिसदा

तेषां मुत्रनश्यात्रे शत्रवः वैरिणः प्रलय यांति व्याधिभव्याधितस्तथा बलहीन पुत्रहीनाः शत्रवस्तस्य सर्वदा सहस्रपठनात्सिद्धि कवचस्य भवेत्सदा तत्कार्याणि सिध्यन्ति यथाशं करभाषितः श्मशानां गारमादाय चूर्णंकृत्वा विधानतः पादोदकेन स्पृष्ठ्वा चालिखेन्लोहशला कयार भूमौ शत्रुनहीन रूपानुत्तराग्राशिरस्तथा हस्ते दत्वातुहृदये कवचंतुद्वये पठेत् शत्रोः प्राणप्रतिष्ठा च कुर्यान्मंत्रेण मन्त्रवित हन्या दस्त्रप्रहारेण शत्रुर्गच्छेयमालये ज्वलिदंगा-पातये भवन्ति ज्वरिताभ्रशे प्रोक्षणैर्वामपादे दीनदारिद्रो भवतिधुंव मूच्चाटनमायाति याति देशाच्चविच्युतो भवेत् पश्चा त्किंकरस्तामेति सत्ये सत्ये नशं शय शमनाशकर देवी सर्व संपत्करं शुभे सर्वस्तुतं देवी कालिके त्वां नमाम्यहं रुद्रयामले श० हा० का० के० स० ।

त्वं ब्रह्मात्वं च ब्रह्माणी त्वं विष्णुस्त्वं च वैष्णवी- शिव शक्ति समायुक्ता ज्वालामुखी नमोस्तुते ॥१॥ ज्वलोरे च नमस्कार त्रिकालरूप धारिणी त्रिविधमोक्षदायि त्वं ज्वालामुखी नमोस्तुते ॥२॥ जकारे विजयादेवी लकारे लक्षदायिनी मकारे हरतेपापे ॥३॥ नवकोटिस्तु चामुंडा

कासान्ता काम रूपिणी चंडमुंडक्षये नीयि ज्वा० ॥४॥ कराली कालिनी काली कालरात्रि त्रिशूलिनी भद्रकाली कपाली च ज्वा० ॥५॥ महामाया चत्वे देवी मयादैत्य-निकेदिनी खड्गशक्ति धरादेवी ज्वा० ॥६॥ नवदुर्गा महादेवी महिषासुर छेदिनी प्रचंड रूपिणी देवी ज्वा० ॥७॥ अष्टभुजा चत्वंदेवी रक्तबीजस्य शोषिणी काली कापान हस्तेषु ज्वा० ॥८॥ महाविद्या देवी पद्मामी नील रूपिणी मधुकैटभ निर्जित्वा ज्वा० ॥९॥ कृष्णांगी धर्म्म-चारिणे रौद्ररूप भयंकरी धूम्राक्षी भस्मकं कृत्वा ज्वा० ॥१०॥ शाकम्भरी सचित्रारी त्रिपुरात्वं च तारिणी त्रिपुरा शूलिती त्वं च ज्वा० ॥ ११ ॥ खेचरी चैव वाराही इन्द्राणी धर्म्म धारिणी शुंभनि शुंभनि र्जित्वा ज्वा० ॥ १२ ॥ निशुंभ भेदिनी देवी अष्ट भुजा महाबला ज्वराक्षेप निपाती च ज्वा० ॥ १३ ॥ आकाशे त्वं च या देवी भुवनेश्वरी मृत्यु लोक च त्वे देवी ज्वा० ॥ १४ ॥ श्वेता रक्ता च त्वं अनेक रूप धारिणी दैत्यानां मन मार्दित्वा ज्वा० ॥१५॥ कृत युगे च त्वं देवी त्रेता यां जनकसुता द्वापरे द्रौपदी

चैव ज्वा० ॥ १६ ॥ मेप राशि श्च त्वं देवी आदित्या
ध्यानव ग्रहा निष्कुंभो त्वं च यागेषु ज्वा० ॥ १७ ॥
सावित्री त्वं चगा यंत्री सारदाहं सवाहिनी चतुर्वेद धरा
देवी ज्वा० ॥ १८ ॥ आरूढा रूपया देवी जालन्धरनि
वासिनी चतुः षष्ठि सभा रूपा ज्वा० ॥ १९ ॥ गण
गन्धर्व सिद्धानां सुरास्त्रयास्त्रि कोटयः देवी चरण प्रसा
देन ज्वा० ॥ ० ॥ विद्यार्थी लभते विद्यां धनार्थी
लभते धनं पुत्रार्थी लभते पुत्रं मोक्षार्थी लभते गतिं
॥ २१ ॥ दरिद्री कुष्टतिष्कुष्टा व्यापोवे धनं ज्वरा
ज्वालामुखी प्रसादेन विमुक्ता नात्र संशय इति पार्थ मह
देवी अर्थ पुत्र प्रदायिनी राज्यं निष्कंटकं देही ब्रह्म
हत्यामुच्यते सदा॥२३॥निः कामो मोक्षनां यां देवीं देहि
मे शिव शंकरं शाहसं देहि धीर त्वं बुद्धि विद्या सुखानि
च ॥ २४ ॥ राज द्वारे च संग्रामे नदी तीरे च संकटे
येस्व रन्ति च मान वाः वाञ्छितार्थ फलं तथा तस्य प्राप्य
तेनात्र संशयः ॥ ६ ॥ जमान्तर कृतं संवत्सर दिनानि
च देवी स्तव प्रसादेन ज्वालामुखी प्रदर्शनात् ॥ २७ ॥
नत्र ज्वाला स्थले ज्वाला आकाश मंडले त्रैलोक्य व्या-

पिंनी ज्वाला ज्वालामुखी नमोस्तुते ॥ २ ॥ नव सिद्धासना देवी दिव्य मूर्ती महेश्वरी हृदये प्राण वं मूर्ति ज्वाला ॥ २९ ॥ नव द्वारेषु वर्तिश्च ज्वाला शक्ति स्वरूपिणी दशार्द्धा चोत्तिथा ज्वाला दिव्य ज्यं तिनमोस्तुते ॥ ३० ॥ ज्वालामुखी